# Shri Bagalamukhi Kavacham 2

# શ્રીબગલામુખીકવચમ્ ૨

## Document Information

Text title : Bagalamukhi Kavacham 2

File name : bagalAmukhIkavacham2.itx

Category : devii, kavacha, dashamahAvidyA, devI

Location : doc_devii

Proofread by : lalitha parameswari parameswari.lalitha at gmail.com

Description/comments : shAktapramodaH

Latest update : July 29, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીબગલામુખીકવચમ્ ૨

કૈલાસાચલમ્ધ્યગમ્પુરવહં શાન્તન્ત્રિનેત્રં શિવં
    વામસ્થા કવચમ્પ્રણમ્ય ગિરિજા ભૂતિપ્રદમ્પૃચ્છતિ ।
દેવી શ્રીબગલામુખી રિપુકુલારણ્યાગ્નિરૂપા ચ યા
    તસ્યાશ્ચાપવિમુક્તમન્ત્રસહિતમ્પ્રીત્યાઽધુના બ્રૂહિ મામ્ ॥ ૧॥

શ્રીશઙ્કર ઉવાચ-
દેવી શ્રીભવવલ્લભે શ ृણુ મહામન્ત્રઁ વિભૂતિપ્રદન્દેવ્યા
    વર્મયુતં સમસ્તસુખદં સામ્રાજ્યદમુક્તિદમ્ ।
તારં રુદ્રવધૂં વિરઞ્ચિમહિલાવિષ્ણુપ્રિયાકામયુક્કાન્તે
    શ્રીબગલાનને મમ રિપુન્નાશાય યુગ્મન્ત્વિતિ ॥ ૨॥

ઐશ્વર્યાણિ પદઞ્ચ દેહિ યુગલં શીઘ્રમનોવાઞ્છિતઙ્કાર્યં
    સાધય યુગ્મયુક્છિવવધૂવહ્નિપ્રિયાન્તો મનુઃ ।
કંસારેસ્તનયઞ્ચ બીજમપરા શક્તિશ્ચ વાણી તથા કીલં શ્રીમતિ
    ભૈરવર્ષિસહિતઞ્છન્દો વિરાટ્સંયુતમ્ ॥ ૩॥

સ્વેષ્ટાર્થસ્ય પરસ્ય વેત્તિ નિતરાઙ્કાર્યસ્ય સમ્પ્રાપ્તયે
    નાનાસાધ્યમહાગદસ્ય નિયતન્નાશાય વીર્યાપ્તયે ।
ધ્યાત્વા શ્રીબગલાનનામનુવરઞ્જપ્ત્વા સહસ્રાખ્યકન્દીર્ઘૈઃ
    ષટ્કયુતૈશ્ચ રુદ્રમહિતાબીજૈર્વિનશ્યાઙ્ગકે ॥ ૪॥

ધ્યાનમ્ ।
સૌવર્ણાસનસંસ્થિતાં ત્રિનયનાં પીતાંશુકોલાસિનીં
    હેમાભાઙ્ગરુચિં શશાઙ્કમુકુટાં સ્રક્ચમ્પકસ્રગ્યુતામ્ ।
હસ્તૈર્મદ્ગરપાશબદ્ધરસનાં સમ્બિભ્રતીં ભૂષણ-
    વ્યાપ્તાઙ્ગીં બગલામુખીં ત્રિજગતાં સંસ્તમ્ભિનીઞ્ચિન્તયે ॥

ૐ અસ્ય શ્રીબગલામુખીબ્રહ્માસ્ત્રમન્ત્રકવચસ્ય
ભૈરવ ઋષિઃ વિરાટ્છન્દઃ શ્રીબગલામુખી દેવતા ક્લીમ્બીજં ઐંશક્તિઃ

શ્રીહ્ઙ્લીલકં મમ પરસ્ય ચ મનોભિલષિતેષ્ટકાર્યસિદ્ધયે વિનિયોગઃ ॥

શિરસિ ભૈરવઋષયે નમઃ ।
મુખે વિરાટ્છન્દસે  નમઃ ।
હૃદિ બગલામુખીદેવતાયૈ નમઃ ।
ગુહ્યે ક્લીમ્બીજાય નમઃ ।
પાદયોઃ ઐંશક્તયે નમઃ ।
સર્વાઙ્ગે શ્રીહ્ઙ્લીલકાય નમઃ ।
ૐ હ્રાં અઙ્ગુષ્ઠાભ્યાન્ નમઃ ।
ૐ હ્રીં તર્જનીભ્યાન્ નમઃ ।
ૐ હ્રૂં મધ્યમાભ્યાન્ નમઃ ।
ૐ હ્રૈં અનામિકાભ્યાન્ નમઃ ।
ૐ હ્રૌં કનિષ્ઠિકાભ્યાન્ નમઃ ।
ૐ હ્રઃ કરતલકરપૃષ્ઠાભ્યાન્ નમઃ ।
ૐ હ્રાઁ હૃદયાય નમઃ ।
ૐ હ્રીં શિરસે સ્વાહા ।
ૐ હ્રૂં શિખાયૈવષટ્ ।
ૐ હ્રૈં કવચાયહુમ્ ।
ૐ હ્રૌં નેત્રત્રયાયવૌષટ્ ।
ૐ હ્રઃ અસ્ત્રાય ફટ્ ॥

મન્ત્રોદ્ધારઃ
ૐ હ્રાઁ ઐં શ્રીં ક્લીં શ્રીબગલાનને મમ રિપૂન્નાશય ૨,
મમૈશ્વર્યાણિ દેહિ ૨,
શીઘ્રમનોવાઞ્છિતકાર્યં સાધયઃ ૨,
હ્રીંસ્વાહા ॥

શિરો મે પાતુ ૐ હ્રીં ઐં શ્રીં ક્લીં પાતુ લલાટકમ્ ।
સમ્બોધનપદમ્પાતુ નેત્રે શ્રીબગલાનને ॥ ૧॥

શ્રુતૌ મમ રિપુમ્પાતુ નાસિકાન્નાશય દ્વયમ્ ।
પાતુ ગણ્ડૌ સદા મામૈશ્વર્યાણ્યન્તન્તુ મસ્તકમ્ ॥ ૨॥

દેહિ દ્વન્દ્વં સદા જિહ્વામ્પાતુ શીઘ્રઁ વચો મમ ।
કણ્ઠદેશં સ નઃ પાતુ વાઞ્છિતમ્બાહુમૂલકમ્ ॥ ૩॥

કાર્યં સાધય દ્વન્દ્વન્તુ કરૌ પાતુ સદા મમ ।
માયાયુક્તા તથા સ્વાહા હૃદયમ્પાતુ સર્વદા ॥ ૪॥

અષ્ટાધિકચત્વારિંશદણ્ડાઢ્યા બગલામુખી ।
રક્ષાઙ્કુરોતુ સર્વત્ર ગૃહેઽરણ્યે સદા મમ ॥ ૫॥

બ્રહ્માસ્ત્રાખ્યો મનુઃ પાતુ સર્વાઙ્ગે સર્વસન્ધિષુ ।
મન્ત્રરાજઃ સદા રક્ષાઙ્કુરોતુ મમ સર્વદા ॥ ૬॥

ૐ હ્લીં પાતુ નાભિદેશમે કટિમે બગલાવતુ ।
મુખી વર્ણદ્વયમ્પાતુ લિઙ્ગમે મુષ્કયુગ્મકમ્ ॥ ૭॥

જાનુની સર્વદુષ્ટાનામ્પાતુ મે વર્ણપઞ્ચકમ્ ।
વાચમુખન્તથા પાદં ષડ્વર્ણા પરમેશ્વરી ॥ ૮॥

જઙ્ઘાયુગ્મે સદા પાતુ બગલા રિપુમોહિની ।
સ્તમ્ભયેતિ પદમ્પૃષ્ઠમ્પાતુવર્ણત્રયમમ ॥ ૯॥

જિહ્વાઁ વર્ણદ્વયમ્પાતુ ગુલ્ફૌ મે કીલયેતિ ચ ।
પાદોદ્ર્ધ્વં  સર્વદા પાતુ બુદ્ધિં પાદતલે મમ ॥ ૧૦॥

વિનાશયપદં પાતુ પાદાઙ્ગુલ્યોર્નખાનિ મે ।
હ્લીં બીજં સર્વદા પાતુ બુદ્ધીન્દ્રિયવચાંસિ મે ॥ ૧૧॥

સર્વાઙ્ગમ્પ્રણવઃ પાતુ સ્વાહા રોમાણિ મેઽવતુ ।
બ્રાહ્મી પૂર્વદલે પાતુ ચાગ્નેયાં વિષ્ણુવલ્લભા ॥ ૧૨॥

માહેશી દક્ષિણે પાતુ ચામુણ્ડા રાક્ષસેઽવતુ ।
કૌમારી પશ્ચિમે પાતુ વાયવ્યે ચાપરાજિતા ॥ ૧૩॥

વારાહી ચોત્તરે પાતુ નારસિંહી શિવેઽવતુ ।
ઊર્દ્ધ્વમ્પાતુ મહાલક્ષ્મીઃ પાતાલે શારદાઽવતુ ॥ ૧૪॥

ઇત્યષ્ટૌ શક્તયઃ પાન્તુ સાયુધાશ્ચ સવાહનાઃ ।
રાજદ્વારે મહાદુર્ગે પાતુ માઙ્ગણનાયકઃ ॥ ૧૫॥

શ્મશાને જલમધ્યે ચ ભૈરવશ્ચ સદાઽવતુ ।
દ્વિભુજા રક્તવસનાઃ સર્વાભરણભૂષિતાઃ ॥ ૧૬॥

યોગિન્યઃ સર્વદા પાતુ મહારણ્યે સદા મમ ।
ઇતિ તે કથિતન્દેવિ કવચમ્પરમાદ્ભુતમ્ ॥ ૧૭॥

શ્રીવિશ્વવિજયન્નામ કીર્તિશ્રીવિજયપ્રદમ્ ।
અપુત્રો લભતે પુત્રન્ધીરં શૂરં શતાયુષમ્ ॥ ૧૮॥

નિર્દ્ધનો ધનમાપ્નોતિ કવચસ્યાસ્ય પાઠતઃ ।
જપિત્વા મન્ત્રરાજન્તુ ધ્યાત્વા શ્રીબગલામુખીમ્ ॥ ૧૯॥

પઠેદિદં હિ કવચન્નિશાયાન્નિયમાત્તુ યઃ ।
યદ્યત્કામયતે કામં સાધ્યાસાધ્યે મહીતલે ॥ ૨૦॥

તત્તત્કામમવાપ્નોતિ સપ્તરાત્રેણ શઙ્કરી ।
ગુરુન્ધ્યાત્વા સુરામ્પીત્વા રાત્રૌ શક્તિસમન્વિતઃ ॥ ૨૧॥

કવચણ્ યઃ પઠેદ્દેવિ તસ્યાઽસાધ્યન્ન કિઞ્ચન ।
યન્ધ્યાત્વા પ્રજપેન્મન્ત્રસહસ્રઙ્કવચમ્પઠેત્ ॥ ૨૨॥

ત્રિરાત્રેણ વશયાતિ મૃત્યુન્તન્નાત્ર સંશયઃ ।
લિખિત્વા પ્રતિમાં શત્રોસ્સતાલેન હરિદ્રયા ॥ ૨૩॥

લિખિત્વા હૃદિ તન્નામ તન્ધ્યાત્વા પ્રજપેન્મનુમ્ ।
એકવિંશદિનં યાવત્પ્રત્યહઞ્ચ સહસ્રકમ્ ॥ ૨૪॥

જપ્ત્વા પઠેત્તુ કવચઞ્ચતુર્વિંશતિવારકમ્ ।
સંસ્તમ્ભઞ્જાયતે શત્રોર્નાત્ર કાર્યા વિચારણા ॥ ૨૫॥

વિવાદે વિજયન્તસ્ય સઙ્ગ્રામે જયમાપ્નુયાત્ ।
શ્મશાને ચ ભયન્નાસ્તિ કવચસ્ય પ્રભાવતઃ ॥ ૨૬॥

નવનીતઞ્ચાભિમન્ત્ર્ય સ્ત્રીણાન્દદ્યાન્મહેશ્વરિ ।
વન્ધ્યાયાઞ્જાયતે પુત્રો વિદ્યાબલસમન્વિતઃ ॥ ૨૭॥

શ્મશાનાઙ્ગારમાદાય ભૌમે રાત્રૌ શનાવથ ।
પાદોદકેન સ્પૃષ્ટ્વા ચ લિખેલ્લૌહશલાકયા ॥ ૨૮॥

ભૂમૌ શત્રોઃ સ્વરૂપઞ્ચ હૃદિ નામ સમાલિખેત્ ।
હસ્તન્તદ્ધૃદયે દત્વા કવચન્તિથિવારકમ્ ॥ ૨૯॥

ધ્યાત્વા જપેન્મન્ત્રરાજન્નવરાત્રમ્પ્રયત્નતઃ ।
મ્રિયતે જ્વરદાહેન દશમેઽહ્નિ ન સંશયઃ ॥ ૩૦॥

ભૂર્જપત્રેષ્વિદં સ્તોત્રમષ્ટગન્ધેન સઁલિખેત્ ।

ધારયેદ્દક્ષિણે બાહૌ નારી વામભુજે તથા ॥ ૩૧॥

સઙ્ગ્રામે જયમાપ્નોતિ નારી પુત્રવતી ભવેત્ ।
બ્રહ્માસ્ત્રાદીનિ શસ્ત્રાણિ નૈવ કૃન્તન્તિ તજ્જનમ્ ॥ ૩૨॥

સમ્પૂજ્ય કવચન્નિત્યમ્પૂજાયાઃ ફલમાલભેત્ ।
બૃહસ્પતિસમો વાપિ વિભવે ધનદોપમઃ ॥ ૩૩॥

કામતુલ્યશ્ચ નારીણાં શત્રૂણાઞ્ચ યમોપમઃ ।
કવિતાલહરી તસ્ય ભવેદ્ગઙ્ગાપ્રવાહવત્ ॥ ૩૪॥

ગદ્યપદ્યમયી વાણી ભવેદ્દેવીપ્રસાદતઃ ।
એકાદશશતં યાવત્પુરશ્ચરણમુચ્યતે ॥ ૩૫॥

પુરશ્ચર્યાવિહીનન્તુ ન ચેદમ્ફલદાયકમ્ ।
ન દેયમ્પરશિષ્યેભ્યો દુષ્ટેભ્યશ્ચ વિશેષતઃ ॥ ૩૬॥

દેયં શિષ્યાય ભક્તાય પઞ્ચત્વઞ્ચાઽન્યથાપ્નુયાત્ ।
ઇદઙ્કવચમજ્ઞાત્વા ભજેદ્યો બગલામુખીમ્ ॥

શતકોટિ જપિત્વા તુ તસ્ય સિદ્ધિર્ન્ન જાયતે ॥ ૩૭॥

દારાઢ્યો મનુજોસ્ય લક્ષજપતઃ પ્રાપ્નોતિ સિદ્ધિમ્પરાં વિદ્યાં
શ્રીવિજયન્તથા સુનિયતન્ધારઞ્ચ વીરં વરમ્ ॥

બ્રહ્માસ્ત્રાખ્યમનું વિલિખ્ય નિતરામ્ભૂર્જેષ્ટગન્ધેન વૈ ધૃત્વા રાજપુરં
વ્રજન્તિ ખલુ યે દાસોઽસ્તિ તેષાન્નૃપઃ ॥ ૩૮॥

ઇતિ વિશ્વસારોદ્ધારતન્ત્રે પાર્વતીશ્વરસંવાદે બગલામુખીકવચં
સમ્પૂર્ણમ્ ॥

Proofread by lalitha parameswari parameswari.lalitha at gmail.com

---

*Shri Bagalamukhi Kavacham 2*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*